# Onkaraproktam Muktisadhanartham Shivarchanopadesham 2

# ઓઙ્કારપ્રોક્તં મુક્તિસાધનાર્થં શિવાર્ચનોપદેશમ્ ૨

## Document Information

Text title : Onkaraproktam Muktisadhanartham Shivarchanopadesham 2

File name : shivArchanopadesham2muktisAdhanArthaM.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 13 | 610-632||

Latest update : May 3, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 3, 2024

*sanskritdocuments.org*

# ઓઙ્કારપ્રોક્તં મુક્તિસાધનાર્થં શિવાર્ચનોપદેશમ્ ૨

ૐકાર ઉવાચ -
ભજધ્વં પાર્વતીનાથં મનોવાક્કાયકર્મભિઃ ।
મનસા કર્મણા વાચા શિવં યો ભજતે સદા ॥ ૬૧૦॥

તં તારયતિ ગૌરીશો ઘોરસંસારસાગરાત્ ।
મહેશાર્ચનમેવૈકં ભુક્તિમુક્તિપ્રદં સ્મૃતમ્ ॥ ૬૧૧॥

તદેવ ઘોરસંસારમહાસાગરતારકમ્ ।
શ્રીમહેશ મહેશેતિ મહેશેતિ ત્રિરુચ્ચરન્ ॥ ૬૧૨॥

સદ્યો મહાઘસઙ્ઘેભ્યો મુચ્યતે નાત્ર સંશયઃ ।
મહેશેતિ પરં નામ ભુક્તિમુક્તિપ્રદં સ્મૃતમ્ ॥ ૬૧૩॥

તતસ્તદેવ સતતં સ્મર્તવ્યં મુક્તિકાઙ્ક્ષિભિઃ ।
મુક્તિકાન્તાઽઽકર્ષકોઽસૌ શિવમન્ત્રઃ શ્રુતિશ્રુતઃ ॥ ૬૧૪॥

ગોપનીયોઽપિ મોક્ષાર્થં વેદાન્તૈઃ પ્રકટીકૃતઃ ।
અતો મહેશ્વરં સામ્બં સાવધાનેન સન્તતમ્ ॥ ૬૧૫॥

ભજધ્વં ભવસન્તાપવિચ્છિત્ત્યર્થં મુદા સુરાઃ ।
શિવાન્યો ન ગતિર્યસ્માદ્ભવતાં મુક્તિકાઙ્ક્ષિણામ્ ॥ ૬૧૬॥

તતો ભજધ્વં મુક્ત્યર્થં શિવમેવ સદા મુદા ।
મોક્ષાર્થી યઃ શિવાદન્યમારાધયિતુમિચ્છતિ ॥ ૬૧૭॥

સ ઉન્મત્ત ઇતિ જ્ઞેયો વેદમાર્ગબહિષ્કૃતઃ ।
તૃપ્ત્યર્થં કણ્ટકગ્રાસી યથા તૃપ્તિં ન વિન્દતિ ॥ ૬૧૮॥

શિવેતરસ્તતસ્તદ્વન્ન મુક્તિમભિવિન્દતિ ।
શિવેતરાર્ચને શ્રદ્ધા યસ્ય સઞ્જાયતે ભ્રમાત્ ॥ ૬૧૯॥

તજ્જન્મ ગતમેવાત્ર વૃથા કણ્ટકજન્મવત્ ।

ન વરં તાદૃશં જન્મ યત્પ્રાપ્ય ભુવિ માનવઃ ॥ ૬૨૦॥

શિવેતરાર્ચને શ્રદ્ધાં કુરુતે મોહસંયુતઃ ।
જન્મ તાદૃગ્વરં દેવા યાદૃશં પ્રાપ્ય માનવઃ ॥ ૬૨૧॥

મહેશારાધને શ્રદ્ધાં કુરુતે ભુક્તિમુક્તિદમ્ ।
ગર્ભધારણજં દુઃખં તન્માતુઃસફલં ભવેત્ ॥ ૬૨૨॥

યદ્ગર્ભાન્નિર્ગતઃ પુત્રઃ શિવભક્તિરતો ભવેત્ ।
તદેવ કુલમુત્કૃષ્ટં ધન્યયિત્યભિમન્મહે ॥ ૬૨૩॥

યસ્મિન્કુલે સમુત્પન્નઃ શિવપૂજારતો ભવેત્ ।
તદેવ કુલમુત્કૃષ્ટં ધન્યમિત્યભિમન્મહે ॥ ૬૨૪॥

કિમર્થં બહુનોક્તેન શિવભક્તિર્મુમુક્ષુભિઃ ।
નિત્યમવ્યભિચારેણ કર્તવ્યા સત્યમુચ્યતે ॥ ૬૨૫॥

- -

કશ્યપ ઉવાચ ।
ઇત્યોઙ્કારવચઃ શ્રુત્વા વિષ્ણુબ્રહ્માદયઃ સુરાઃ ।
શિવાર્ચનરતાઃ સન્તસ્તપસ્તેપુર્દુરાસદમ્ ॥ ૬૨૬॥

પશ્યેમાઞ્છાઙ્કરાન્ધન્યાન્મહેશારાધનોત્સુકાન્ ।
એતેષાં શઙ્કરાદન્યઃ પૂજ્યો નાસ્ત્યેવ સર્વદા ॥ ૬૨૭॥

શિવાન્યં નાર્ચયન્ત્યેતે સ્વપ્નેઽપિ શિવતત્પરાઃ ।
ન તે નમન્તિ મોહેનાપ્યશિવં સંશિતવ્રતાઃ ॥ ૬૨૮॥

નમન્તિ ચન્દ્રરેખાઙ્કં ત્રિશૂલાઙ્કં મહેશ્વરમ્ ।
બિલ્વપત્રાદિભિઃ સમ્યક્પૂજયન્તિ નમન્તિ ચ ॥ ૬૨૯॥

શિવલિઙ્ગં પૂજયન્તિ પ્રણમન્તિ સ્તુવન્તિ ચ ।
પશ્યન્તિ ચ પ્રયત્નેવ શિવલિઙ્ગં સમર્ચિતમ્ ॥ ૬૩૦॥

એતે નિર્વ્યાજભક્ત્યૈવં જન્મના શિવપૂજકાઃ ।
શીઘ્ર મુક્તા ભવિષ્યન્તિ મહેશાનુગ્રહાન્મુને ॥ ૬૩૧॥

પૂજય ત્વં મહાદેવં શ્રદ્ધયા પરયા મુને ।
મહાદેવપ્રસાદેન શીઘ્ર મુક્તો ભવિષ્યસિ ॥ ૬૩૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઓઙ્કારપ્રોક્તં મુક્તિસાધનાર્થં શિવાર્ચનોપદેશં ૨ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૩ । ૬૧૦-૬૩૨ ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 13 . 610-632 ..

Notes:

Oṃkāra ઓંકાર delivers the upadeśa ઉપદેશ to Brahmā બ્રહ્મા, Viṣṇu વિષ્ણુ et al Deva-s દેવાઃ, about Cultivating Worship of Śiva શિવ i.e. Śivārcana શિવાર્ચન as the means to Experiencing the World as well as Liberation from it - viz. Bhukti ભુક્તિ and Muktiમુક્તિ).

Ṛṣi Kaśyapa ઋષિ કશ્યપ narrates that hearing so from Oṃkāra ઓંકાર, the Brahmā બ્રહ્મા, Viṣṇu વિષ્ણુ et al Deva-s દેવાઃ ardently engaged themselves in i.e. Śivārcana શિવાર્ચન.

Encoded and proofread by Ruma Dewan

---

*Onkaraproktam Muktisadhanartham Shivarchanopadesham 2*

pdf was typeset on May 3, 2024

Please send corrections to *sanskrit@cheerful.com*